## अध्यायः- ६१ chapter-61

सूत उवाच[1] ।।

ततो घटोत्कचो मुक्त्वा तत्र कामकटंकटाम् ।।
पुत्रेणानुगतो धीमान्वियता द्वारकां ययौ ।। १

आगच्छन्तं च तं[2] दृष्ट्वा राक्षसं राक्षसानुगम् ।।
द्वारकावासिनो योधाश्चक्रुरत्युल्वणं रवम् ।। २

ग्रामे ग्रामे सुसंनद्धा नवलक्षमिता रथाः ।।
राक्षसौ द्वौ समायातौ पात्यतां विशिखैरिति ।। ३

तान्गृहीतायुधान्दृष्ट्वा यदुवीरान्घटोत्कचः ।।
प्रगृह्य विपुलं बाहुं जगौ तारस्वरेण सः ।। ४

राक्षसं वित्तं मां वीरा भीमपुत्रं घटोत्कचम् ।।
सुप्रियं वासुदेवस्य प्रणामार्थमुपागतम् ।। ५

निवेदयत मां प्राप्तं यादवेन्द्राय सात्मजम् ।।
इति तस्य वचः श्रुत्वा ते कृष्णाय न्यवेदयन् ।। ६

आह देवः[3] सभास्थश्च शीघ्रमत्राव्रजत्वसौ ।।
ततः प्रवेशयामासुर्द्वारकां ते घटोत्कचम् ।। ७

---

१ अ. प्रतौ 'उवाच' नास्ति ।
२ ब. तां
३ ब. देव

सपुत्रः सो/पि रम्याणि वनान्युपवनानि च ।।
क्रीडाशैलांश्च हर्म्याणि संपश्यन्ना गतः सभाम् ।। ८

स तत्र उग्रसेनं च वसुदेवं च सात्यकिम ।।
अक्रूरराम प्रमुखान्ववन्दे कृष्णमेव च ।। ९

तं पादयोर्निपतितं समालिंग्य सहात्मजम् ।।
साशिषं स्वसमीपस्थमुपवेश्येदम ब्रवीत् ।। १०

पुत्रराक्षसार्दूल कुरुणार्द[1] कुलवर्धन[2] ।।
कुशलं सर्वतः[3] कच्चित्किमर्थस्ते समागमः ।। ११

घटोत्कच उवाच[4] ।।
देव युष्मत्प्रसादेन सर्वतः कुशलं मम श्री ।।
श्रूयतां कारणं स्वामिन्यदर्थमहमागतः ।। १२

देवोपदिष्ट भार्यायां जातो/यं तनयो मम ।।
स च प्रश्नं वक्ष्यति[5] त्वां श्रूयतामागतस्त्वतः ।। १३

श्रीकृष्ण उवाच ।।[6]
वत्स मौर्वेय ब्रूहि त्वं सर्वं पृच्छ यदिच्छसि ।।
यथा घटोत्कचो मह्यं सुप्रियश्च तथा भवान् ।। १४

---

१ ब. करुणा
२ अ. नः
३ ब. सर्वत
४ अ. प्रतौ 'उवाच' नास्ति ।
५ अ. प्रक्ष्यति
६ श्री भगवानुवाच अ. ब. पाठः ।

बर्बरीक उवाच ।।
प्रणम्य त्वामादिदेवं मनोबुद्धि समाधिभिः ।।
प्रक्ष्यामि केन श्रेयः स्यार्ज्जतोर्जातस्य माधव ।। १५

केचिच्छ्रेयो धर्ममाहुरैश्वर्यं त्याग भोजनम् ।।
केचिद्भूमें तपो द्रव्यं भोगान्मुक्तिं च केचन ।। १६

तदेवं शतसंख्येषु श्रेयस्सु पुरुषोत्तम ।।
मम चैवं कुलस्यास्य श्रेयो यद्ब्रूहि निश्चितम् ।। १७

श्री कृष्ण उवाच ।।[१]
वत्स पृथकपृथकप्रोक्तं वर्णानां श्रेय उत्तमम ।।
ब्राह्मणानां तपो मूलं दमोऽध्ययन मेव च ।। १८

धर्मप्रकटनं चापि श्रेय उक्तं मनीषि भिः ।।
बलं साध्यं पूर्वमेव क्षत्रियाणां प्रकीर्तितम् ।। १९

दुष्टानां शासनं चापि साधूनां परिपालनम् ।।
पाशुपाल्यं च वैश्यानां कृषिर्विज्ञानमेव च ।। २०

शूद्रस्य[२] द्विजशुश्रूषा तया जीवन्वणिग् भवेत् ।।
शिल्पैर्वा विविधैर्वा वै द्विजाति हितमाचरन् ।। २१

---

१ अ. श्री भगवानुवाच ।। ब. श्री भगवानु० ।।
२ अ. शुद्रस्य

भार्यारिति भूत्यधीष्टा शुचिः[१] श्रद्धा परायणः ।।
नमस्कारेण मन्त्रेण पंचयज्ञान्न्हापयेत् ।। २२

तद्भवान्क्षत्रिय कुले जातो ऽसि कुरु तच्छृणु ।।
बलं साधय पूर्वंत्वमतुलं तेन शिक्षय ।। २३

दुष्टानूपालय साधूंश्च स्वर्गमेवमवाप्स्यसि ।।
बलं च लभ्यते[२] पुत्र देवीनां सुप्रसादतः ।। २४

तद्भवान्बल प्राप्त्यर्थं देव्याराधनमाचर ।। २५

बर्बरीक उवाच[३] ।।
कस्मिन्क्षेत्रे च कां देवी कथमाराधयाम्य हम् ।।
एतत्प्रसाद प्रवणं मनः कृत्वा निवेदय[४] ।। २६

सूत उवाच ।।[५]
इति पृष्टः[६] क्षणं ध्यात्वा प्राह दामोदरो विभुः ।।
वत्स क्षेत्रं प्रवक्ष्यामि यत्र तप्स्यसितत्तपः ।।
गुप्तक्षेत्रमिति ख्यातं महीसागर संगमे ।। २७

तत्र त्रिभुवने याश्च संति देव्यः पृथग्विधाः ।।
नारदेन समानीतास्ताश्चैक्यं सुमहात्मना ।। २८

---

१ अ. ब. शुचि
२ ब. लभते
३ अ. प्रती उवाच नास्ति ।
४ अ. प्रकीर्तयः ब. प्रकतये
५ अ. प्रती इत्ययं पाठः नास्ति
६ ब. पृष्ठ

चतस्त्रस्तस्य दिग्देव्यो नव दुर्गाश्च संति याः ।।
समाराधय ता गत्वा तासामैक्यं हि दुर्लभम् ।। २९

नित्यं पूजय ताः पुत्र पुष्प धूप विलेपनैः ।।
स्तुतिभिश्चोपहारैश्च यथा तुष्यंति तास्तव ।। ३०

स्वर्गस्तथा मुक्तिपदं च सत्सुखं न दुर्लभं सत्य मेतत्तवोक्तम् ।। ३१

सूत उवाच ।।[१]
एवमुक्तवा बर्बरीकं कृष्णः[२] प्राह घटोत्कचम् ।।
घटोत्कचार्य पुत्रस्ते द्रढं सुत्ददयो ह्यसौ ।। ३२

तस्मात्सुत्ददयेत्यैवं दत्तं नाम मया द्विकम् ।।
एवमुक्त्वा समालिंग्य संतर्प्य विविधैर्धनैः ।। ३३

गुप्तक्षेत्राय भगवान्बर्बरीकं समादिशत्[३] ।।
सो ऽथ कृष्णं नमस्कृत्य पितरं यादवांश्च तान् ।। ३४

अनुज्ञाप्य च तान्सर्वान्गुप्तक्षेत्रं समाव्रजत् ।।
घटोत्कचो ऽपि कृष्णेन विसृष्टः स्ववनं ययौ ।। ३५

---

१ अ. ब. हस्तप्रतिषु इत्ययं पाठः नास्ति ।
२ ब. कृष्ण
३ ब. समादिशत

स्मरन्पुत्रगुणान्पत्न्या स्वराज्यं समपालयत् ॥
ततः सुत्ददयो धीमान्दगृध स्थल्यां कृताश्रमः[1] ॥ ३६

त्रिकालं पूजयामास देवीः कर्म समाधिभिः ॥
नित्यं पुष्पैश्च धूपैश्च उपहारैः पृथग्विधैः ॥ ३७

तस्याराधयतो देव्यस्तुतुषुर्हायिनैस्त्रिभिः ॥
ततः प्रत्यक्षतो भूत्वा बलात्तस्य महात्मनः ॥ ३८

बलं यत्त्रिषु लोकेषु कस्यचिन्नास्ति दुर्लभम् ॥
ऊचुश्च कंचित्कालं त्वं वसात्रैव महाद्युते ॥ ३९

संगत्या विजयस्य त्वं भूयः श्रेयो ह्यवाप्स्यसि ॥
इत्युक्तः सर्वदेवीभिः स तत्रैव व्यवस्थितः ॥ ४०

आजगामाथ[2] विजयो नाम्ना मागधब्राह्मणः[3] ॥
स सर्वां पृथिवीं कृत्वा पादाक्रांतां द्विजोत्तमः ॥ ४१

काश्यां[4] विद्याबलं प्राप्य साधनार्थमुपाययौ ॥
गुहेश्वरमुखान्येष सप्तलिंगान्यपूजयेत् ॥ ४२

---

१ अ. कृताश्रयः
२ ब. आगमागोय
३ अ. ब्रह्मणकः
४ अ. कास्यां

आराधयामास चिरं देवीर्विद्याफलाप्तये ।।
ततस्तुष्टास्तस्य देव्यः स्वप्ने प्रोचुरिदं वचः ।। ४३

विद्यां साधय त्वं साधो सिद्धमातुः पुरो गणे ।।
अयं भक्तः सुत्ददयः[१] साहाय्यं ते करिष्यति ।। ४४

ततस्तद्वचनं श्रुत्वा विजयः स्वप्नमध्यतः ।।
उत्थाय गत्वा देव्यास्तं वव्रे भीमात्मजात्मजम् ।। ४५

सोऽपि देवीवचः श्रुत्वा मेने साहाय्य कारणम् ।।
ततः कृष्ण चतुर्दश्यामुपोष्य विजयः शुचिः[२] ।। ४६

स्नात्वाभ्यर्च्यैव लिंगानि देवीश्चैवार्चयत्पृथक् ।।
कृत्वा स्नानमुपोष्यैव बर्बरीकोऽतिकेऽभवत् ।। ४७

प्रथमायां ततो रात्रौ ययौ सिद्धाम्बिकापुरः ।।
मंडलं तत्र कृत्वा च भगकारां करान्नव ।। ४८

अष्टदिक्ष्वष्ट कीलांश्च निखन्यैव ससूत्रकान् ।।
कृष्णाजिनकधरो भूत्वा बर्बरीकसमन्वितः ।। ४९

---

१ ब. सुहृदयः
२ अ. शुचिः

शिखामाबद्धय दिग्बंधं कृत्वारंभे ततो विधिम् ।।
मध्ये मंडलस्यापि कुंडे शुभ्रे[१] त्रिमेखले[२] ।। ५०

समर्प्य च ततः खड्गं खादिरं मंत्र तेजितम् ।।
संस्थाप्य कीलानभितो बर्बरीकमथा ब्रवीत् ।। ५१

शुचिर्विनिद्रः[३] संतिष्ठ स्तवं देव्याः समुद्गिरन् ।।
यावत्कर्म करोम्येष यथा विघ्नं न जायते ।। ५२

इत्युक्ते संस्थिते तत्र बर्बरीके महाबले[४] ।।
विजयः शोषणं दाहं प्लावनं कृतवान्यमी ।। ५३

ततः सुखासनो भूत्वा गुंगुरुभ्यो नमः इति ।।
मंत्रमष्टोत्तरशतं जप्त्वा गुरुभ्यः प्रणम्य च ।।
ततो गणेश्वरविधानमारब्धवान् ।। ५४

अथातः संप्रवक्ष्यामि मंत्रं गणपतेः परम् ।। ५५

सर्वकार्यकरं स्वप्लं महार्थं सर्वसिद्धदम् ।। ५६

---

१ अ. शुभे
२ अ. ब. त्रिमेखलाः
३ अ. शुचि
४ ब. बलं

ॐ गां गीं गूं गैं गौं गः ।।
सप्ताक्षरोऽयं महामंत्रः ।।
ॐ गणपति मंत्रस्य विघ्नेश्वरो देवता ।।
ॐ गां गणपतये नमः ।।
अष्टोत्तरशतं सहस्त्रं लक्षं कोटिं चेति यथाशक्ति
जप्त्वा दशांश होमार्थं गणेशाग्नये आवाह्यामीति ।।
सर्व विघ्नानि नश्यंति मनो भीष्टं च सिध्यति ।। ५७

डाकिन्यो[1] यातुधानाश्च प्रेताद्याश्च भयंकराः ।।
शत्रूणां जायते नाशो वशीकरणमेव च ।। ५८

इमं[2] गणेश्वरं कल्पं विजानन्विजयोऽपि च ।।
तिलकं विधिना कृत्वा जप्त्वा चाष्टोत्तरं शतम् ।। ५९

दशांश गुटिका हुत्वा पूज्य सिद्धि विनायकम् ।।
सिद्धेय क्षेत्रपालस्य चक्रे पूजां ततो निशि ।। ६०

*३ इति श्री स्कंदे.....महाविद्या साधने गाणेश्वर कल्पवर्णनं नामैकष-
-ष्टितमोऽध्यायः ।

---

१ ब. डाकिनी
२ अ. ब. इदं
*३ अ. इति श्री स्कंदपुराणे कुमारिका खंडे महाविद्या साधने ।।
ब. इति श्री कुमारिका खंडे महाविद्या साधने द्वितीय अष्टशोऽध्यायः ।।

(Actually it is 61st chapter)